# Rigvediya Pancharudram

# ऋग्वेदीय पञ्चरुद्रम्

## Document Information

Text title : RRigvedIyapancharudram

File name : RRigvedIyapancharudram.itx

Category : veda, svara, shiva, panchaka

Location : doc_veda

Transliterated by : Kr. PK

Proofread by : Kr. PK

Latest update : March 17, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2025

*sanskritdocuments.org*

# ऋग्वेदीय पञ्चरुद्रम्

॥ ॐ श्री गणेशाय नमः ॥

## गणपति स्तुतिः सस्वरः

हरिः ॐ
गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ २.२३.०१॥
(ऋषिः गृत्समदः, देवता ब्रह्मणस्पतिः, छन्दः जगती, स्वरः निषादः)

निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् ।
न ऋते तवत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥ १०.११२.०९॥
(नभःप्रभेदनो वैरुपः, इन्द्रः, निचृत्रिष्टुप्, धैवतः)

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥ ०८.८१.०१॥
(कुसीदी काण्वः, इन्द्रः, गायत्री, षड्जः)

ॐ श्री महागणपतये नमः ॥

## पञ्चरुद्रम् सस्वरः

अथ पञ्चरुद्रम् प्रारम्भः ।

(प्रथममण्डले त्रिचत्वारिंशं सूक्तम् १.४३
ऋषिः कण्वो घौरः ।
देवता १, २, ४-६ रुद्रः, ३ मित्रावरुणौ; ७-९ सोमः ।
छन्दः १-४, ७, ८ गायत्री, ५ विराड्गायत्री, ६ पादनिचृद्गायत्री, ९ अनुष्टुप् ।
स्वरः १-८ षड्जः, ९ गान्धारः ॥)

हरिः ॐ

कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय  तव्यसे । वोचेम शंतमं हृदे ॥ १.०४३.०१॥

यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ॥ १.०४३.०२॥

यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति । यथा विश्वे सजोषसः ॥ १.०४३.०३॥

गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् । तच्छंयोः सुम्नमीमहे ॥ १.०४३.०४॥

यः शुक्र इव सूर्यो हिरण्यमिव रोचते । श्रेष्ठो देवानां वसुः ॥ १.०४३.०५॥

शं नः करत्यर्वते सुगं मेषाय मेष्ये । नृभ्यो नारिभ्यो गवे ॥ १.०४३.०६॥

अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् । महि श्रवस्तुविनृम्णम् ॥ १.०४३.०७॥

मा नः सोमपरिबाधो मारातयो जुहुरन्त । आ न इन्दो वाजे भज ॥ १.०४३.०८॥

यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य ।
मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ॥ १.०४३.०९॥

(प्रथम मण्डले चतुर्दशोत्तरशततं सूक्तम्
ऋषिः - कुत्स आङ्गिरसः । देवता रुद्रः ।
छन्दः १ जगती, २, ७ निचृज्जगती, ३, ६, ८, ९ विराड्जगती,
४, ५, ११ भुरिक्त्रिष्टुप्, १० निचृत्त्रिष्टुप् ।
स्वरः १-३, ६-९ निषादः, ४, ५, १०, ११ धैवतः ॥)

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ १.११४.०१॥

मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ १.११४.०२॥

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥ १.११४.०३॥

त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥ १.११४.०४॥

दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥ १.११४.०५॥

इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।

रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥ १.११४.०६॥

मानो महान्तमुत मानो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मानो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १.११४.०७॥

मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ १.११४.०८॥

उपते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।
भद्रा हिते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥ १.११४.०९॥

आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥ १.११४.१०॥

अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ १.११४.११॥

(द्वितीयमण्डले त्रयस्त्रिंशं सूक्तम्
ऋषिः गृत्समदः । देवता रुद्रः ।
छन्दः १, ५, ९, १३-१५ निचृत्रिष्टुप्, ३, ६, १०, ११, विराट्त्रिष्टुप्,
४, ८ त्रिष्टुप्, २, ७ पङ्क्तिः, १२ भुरिक्पङ्क्तिः ।
स्वरः १, ३-६, ८-११, १३-१५ धैवतः, २, ७, १२ पञ्चमः ॥)

आते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ।
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥ २.०३३.०१॥

त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।
व्य(१)स्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ॥ २.०३३.०२॥

श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।
पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥ २.०३३.०३॥

मात्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥ २.०३३.०४॥

हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ॥ २.०३३.०५॥

उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
घृणीव च्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ॥ २.०३३.०६॥

क्व(१)स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥ २.०३३.०७॥

प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥ २.०३३.०८॥

स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ॥ २.०३३.०९॥

अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥ २.०३३.१०॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥ २.०३३.११॥

कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ॥ २.०३३.१२॥

यावो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि ॥ २.०३३.१३॥

परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥ २.०३३.१४॥

एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥ २.०३३.१५॥

(षष्ठमण्डले चतुःसप्ततितमं सूक्तम्
ऋषिः भरद्वाजो बार्हस्पत्यः । देवता सोमारुद्रौ ।
छन्दः १, २, ४ त्रिष्टुप्, ३ निचृत्त्रिष्टुप्, स्वरः धैवतः ॥)

सोमारुद्रा धारयेथामसुर्यं(१)प्र वामिष्टयोऽरमश्नुवन्तु ।
दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ॥ ६.०७४.०१॥

सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश ।

आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु ॥ ६.०७४.०२॥

सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥ ६.०७४.०३॥

तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः ।
प्रनो मुञ्चतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥ ६.०७४.०४॥

(सप्तममण्डले षट्चत्वारिंशं सूक्तम्
ऋषिः वसिष्ठः । देवता रुद्रः ।
छन्दः १ विराड्जगती, २ निचृत्त्रिष्टुप्, ३ निचृत् जगती, ४ स्वराट्पङ्क्तिः ।
स्वरः १, ३, निषदः, २ धैवतः, ४ पञ्चमः ॥)

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने ।
अषाव्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ॥ ७.०४६.०१॥

स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति ।
अवन्नवन्तीरुप नो दुरश्चरानमीवो रुद्र जासु नो भव ॥ ७.०४६.०२॥

याते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः ।
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥ ७.०४६.०३॥

मानो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य ।
आनो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ॥ ७.०४६.०४॥

Assorted Richas.

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥ ८.०६३.१२॥
(प्रगाथः काण्वः, देवाः, त्रिष्टुप्, गान्धारः)

त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे ।
त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ॥ २.००१.०६॥
(आङ्गिरसः शौनहोत्रो भार्गवो गृत्समदः, अग्निः, भुरिक् त्रिष्टुप्, धैवतः)

आवो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ ४.००३.०१॥
(वामदेवः, अग्निः, निचृत्त्रिष्टुप्, धैवतः)

तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम् ।
पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनाम् ॥ ५.००३.०३॥
(वसुश्रुत आत्रेयः, अग्निः, निचृत्त्रिष्टुप्, धैवतः)

भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ ।
बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ॥ ६.०४९.१०॥ ऋजिश्वाः, विश्वे देवाः, त्रिष्टुप्, धैवतः)

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥ ५.०४२.११॥
(अग्निः, विश्वे देवाः, निचृत्त्रिष्टुप्, धैवतः)

अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥ १०.०६०.१२॥
(बन्ध्वादयो गौपायनाः, हस्तः, निचृदनुष्टुप्, गान्धारः)

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ७.०५९.१२॥
(वसिष्ठः, रुद्रः, अनुष्टुप्, गान्धारः)

## शान्ति पाठमन्त्रः

हरिः ॐ
ॐ
तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

ईशानस्सर्वविद्यानामीश्वरः सर्वभूतानां ।
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽस्तु सदाशिवोम् ॥

ॐ
शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिꣳसीः ।
निवर्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥

ॐ
विश्वानि देव सवितर्दुरितानि परासुव ।
यद्भद्रं तन्न आसुव ॥

ॐ
द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

ॐ
सर्वेषां वा एष वेदानाꣳरसो यत्सामः ।
सर्वेषामेवैनमेतद् वेदानाꣳ रसेनाभिषिश्चति ॥

ॐ
शम्भवे नमः । नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय
कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

ॐ
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥

ॐ
शान्तिः शान्तिः शान्तिः ॥

अनेन श्री रुद्राभिषेककर्मणा श्री भवानीशङ्कर महारुद्राः प्रीयतां न मम ।

इति श्रीऋग्वेदीय पञ्चरुद्रं समाप्ता ।
॥ ॐ श्री साम्ब सदाशिवार्पणमस्तु ॥

# श्रीऋग्वेदीय पञ्चरुद्रम्

॥ ॐ श्री गणेशाय नमः ॥

## गणपति स्तुतिः निःस्वरः

हरिः ॐ
गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ २.२३.०१॥
(ऋषिः गृत्समदः, देवता ब्रह्मणस्पतिः, छन्दः जगती, स्वरः निषादः)

निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् ।
न ऋते तवत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥ १०.११२.०९॥
(नभःप्रभेदनो वैरुपः, इन्द्रः, निचृत्त्रिष्टुप्, धैवतः)

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥ ०८.८१.०१॥
(कुसीदी काण्वः, इन्द्रः, गायत्री, षड्जः)

ॐ श्री महागणपतये नमः ॥

## पञ्चरुद्रम् निःस्वरः

अथ पञ्चरुद्रम् प्रारम्भः ।

(प्रथममण्डले त्रिचत्वारिंशं सूक्तम् १.४३
ऋषिः कण्वो घौरः ।
देवता १, २, ४-६ रुद्रः, ३ मित्रावरुणौ; ७-९ सोमः ।
छन्दः १-४, ७, ८ गायत्री, ५ विराड्गायत्री, ६ पादनिचृद्गायत्री, ९ अनुष्टुप् ।
स्वरः १-८ षड्जः, ९ गान्धारः ॥)

हरिः ॐ
कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे । वोचेम शंतमं हृदे ॥ १.०४३.०१॥

यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ॥ १.०४३.०२॥

यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति । यथा विश्वे सजोषसः ॥ १.०४३.०३॥

गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् । तच्छंयोः सुम्नमीमहे ॥ १.०४३.०४॥

यः शुक्र इव सूर्यो हिरण्यमिव रोचते । श्रेष्ठो देवानां वसुः ॥ १.०४३.०५॥

शं नः करत्यर्वते सुगं मेषाय मेष्ये । नृभ्यो नारिभ्यो गवे ॥ १.०४३.०६॥

अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् । महि श्रवस्तुविनृम्णम् ॥ १.०४३.०७॥

मा नः सोमपरिबाधो मारातयो जुहुरन्त । आ न इन्दो वाजे भज ॥ १.०४३.०८॥

यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य ।
मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ॥ १.०४३.०९॥

(प्रथम मण्डले चतुर्दशोत्तरशततं सूक्तम्
ऋषिः - कुत्स आङ्गिरसः । देवता रुद्रः ।
छन्दः १ जगती, २, ७ निचृज्जगती, ३, ६, ८, ९ विराड्जगती,
    ४, ५, ११ भुरिक्त्रिष्टुप्, १० निचृत्त्रिष्टुप् ।
स्वरः १-३, ६-९ निषादः, ४, ५, १०, ११ धैवतः ॥)

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ १.११४.०१॥

मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ १.११४.०२॥

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥ १.११४.०३॥

त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥ १.११४.०४॥

दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥ १.११४.०५॥

इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥ १.११४.०६॥

मानो महान्तमुत मानो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मानो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १.११४.०७॥

मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ १.११४.०८॥

उपते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।
भद्रा हिते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥ १.११४.०९॥

आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥ १.११४.१०॥

अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ १.११४.११॥

(द्वितीयमण्डले त्रयस्त्रिंशं सूक्तम्
ऋषिः गृत्समदः । देवता रुद्रः ।
छन्दः १, ५, ९, १३-१५ निचृत्त्रिष्टुप्, ३, ६, १०, ११, विराट्त्रिष्टुप्,
४, ८ त्रिष्टुप्, २, ७ पङ्क्तिः, १२ भुरिक्पङ्क्तिः ।
स्वरः १, ३-६, ८-११, १३-१५ धैवतः, २, ७, १२ पञ्चमः ॥)

आते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ।
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥ २.०३३.०१॥

त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।
व्य(१)स्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ॥ २.०३३.०२॥

श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।
पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥ २.०३३.०३॥

मात्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥ २.०३३.०४॥

हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ॥ २.०३३.०५॥

उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
घृणीव च्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ॥ २.०३३.०६॥

क्व(१) स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥ २.०३३.०७॥

प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥ २.०३३.०८॥

स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ॥ २.०३३.०९॥

अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥ २.०३३.१०॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।

मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥ २.०३३.११॥

कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ॥ २.०३३.१२॥

यावो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि ॥ २.०३३.१३॥

परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥ २.०३३.१४॥

एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥ २.०३३.१५॥

(षष्ठमण्डले चतुःसप्ततितमं सूक्तम्
ऋषिः भरद्वाजो बार्हस्पत्यः । देवता सोमारुद्रौ ।
छन्दः १, २, ४ त्रिष्टुप्, ३ निचृत्रिष्टुप्, स्वरः धैवतः ॥)

सोमारुद्रा धारयेथामसुर्यं(१) प्र वामिष्टयोऽरमश्नुवन्तु ।
दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ॥ ६.०७४.०१॥

सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश ।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु ॥ ६.०७४.०२॥

सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥ ६.०७४.०३॥

तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः ।
प्रनो मुञ्चतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥ ६.०७४.०४॥

(सप्तममण्डले षट्चत्वारिंशं सूक्तम्
ऋषिः वसिष्ठः । देवता रुद्रः ।
छन्दः १ विराड्जगती, २ निचृत्रिष्टुप्, ३ निचृत् जगती, ४ स्वराट्पङ्क्तिः ।
स्वरः १, ३, निषदः, २ धैवतः, ४ पञ्चमः ॥)

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने ।
अषाव्हाय सहमानाय वेधसे तिग्मायुधाय भरता शऋणोतु नः ॥ ७.०४६.०१॥

स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति ।
अवन्नवन्तीरुप नो दुरश्चरानमीवो रुद्र जासु नो भव ॥ ७.०४६.०२॥

याते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः ।
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥ ७.०४६.०३॥

मानो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य ।
आनो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ॥ ७.०४६.०४॥

Assorted Richas. Rishi, Devata, Chanda, Svara ऋषिः, देवता, छन्द, स्वरः in the sequence are given on the right of each Richa.
The sequence in the assorted Richas slightly differ in comparison with the rudrasUktam, otherwise all Richas are same. It is requested to confirm the difference.)

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥ ८.०६३.१२॥
(प्रगाथः काण्वः, देवाः, त्रिष्टुप्, गान्धारः)

त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे ।
त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ॥ २.००१.०६॥
(आङ्गिरसः शौनहोत्रो भार्गवो गृत्समदः, अग्निः, भुरिक् त्रिष्टुप्, धैवतः)

आवो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ ४.००३.०१॥
(वामदेवः, अग्निः, निचृत्त्रिष्टुप्, धैवतः)

तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम् ।
पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनाम् ॥ ५.००३.०३॥
(वसुश्रुत आत्रेयः, अग्निः, निचृत्त्रिष्टुप्, धैवतः)

भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ ।
बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ॥ ६.०४९.१०॥ ऋजिश्वाः, विश्वे देवाः, त्रिष्टुप्, धैवतः)

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥ ५.०४२.११॥
(अग्निः, विश्वे देवाः, निचृत्त्रिष्टुप्, धैवतः)

अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥ १०.०६०.१२॥
(बन्ध्वादयो गौपायनाः, हस्तः, निचृदनुष्टुप्, गान्धारः)

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ७.०५९.१२॥
(वसिष्ठः, रुद्रः, अनुष्टुप्, गान्धारः)

## शान्ति पाठमन्त्रः

हरिः ॐ
ॐ
तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

ईशानस्सर्वविद्यानामीश्वरः सर्वभूतानां ।
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्बह्मा शिवो मेऽस्तु सदाशिवोम् ॥

ॐ
शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिँसीः ।
निवर्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥

ॐ
विश्वानि देव सवितर्दुरितानि परासुव ।
यद्भद्रं तन्न आसुव ॥

ॐ
द्यौः शान्तिरन्तरिक्षँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

ॐ
सर्वेषां वा एष वेदानाँरसो यत्सामः ।
सर्वेषामेवैनमेतद् वेदानाँ रसेनाभिषिञ्चति ॥

ॐ
शम्भवे नमः । नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय
कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

ॐ

यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥

ॐ
शान्तिः शान्तिः शान्तिः ॥

अनेन श्री रुद्राभिषेककर्मणा श्री भवानीशङ्कर महारुद्राः प्रीयतां न मम ।

इति श्रीऋग्वेदीय पञ्चरुद्रं समाप्ता ।
॥ ॐ श्री साम्ब सदाशिवार्पणमस्तु ॥

The compilations of Ṛcā-s ऋचा in RudraSūktam रुद्रसूक्तम् and PañcaRudram पञ्चरुद्रम् are almost similar for the most part. Each comprises of the Sūktāni सूक्तानि 1.43 १।४३ , 1.114 १।११४ , 2.33 २।३३ , 6.74 ६।७४ and 7.46 ७।०४६ in a sequence, followed by some assorted Ṛcā-s ऋचा that have minor differences between the two with respect to content and order.

Encoded and proofread by Kr. PK

*Rigvediya Pancharudram*
pdf was typeset on March 19, 2025

Please send corrections to *sanskrit@cheerful.com*